# Dashamahavidya Stutih

# दशमहाविद्यास्तुतिः

## Document Information

Text title : Dashamahavidya Stutih

File name : dashamahAvidyAstutiH.itx

Category : devii, devI, dashamahAvidyA, stuti, sanskritgeet

Location : doc_devii

Author : Purnakshyapa, disciple of Vamadev

Proofread by : Rajani Arjun Shankar

Latest update : March 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# दशमहाविद्यास्तुतिः

ॐ जय जगदीश्वरि कालि कुलेश्वरि असुर-भयङ्करि पापयुतम् ।
नाद-चलितगिरि-पूरित-कन्दरि जय शिवसुन्दरि पाहि सुतम् ॥ १॥

नीलसरस्वति तारे भगवति हर जडतापदमात्मगतम् ।
पृथुलम्बोदरि भूषणविषधरि जय शिवसुन्दरि पाहि सुतम् ॥ २॥

ईश्वर-केशव-रुद्र-कमलभव-शिरसि सदाशिवमुदवसितम् ।
हे त्रिपुरेश्वरि भवसागरतरि जय शिवसुन्दरि पाहि सुतम् ॥ ३॥

इन्द्रमुकुटवति लोहितभास्वति वेदभुजे नतमार्तरुतम् ।
हे भुवनेश्वरि सुरकुलशङ्करि जय शिवसुन्दरि पाहि सुतम् ॥ ४॥

मातर्भैरवि दुरित-तिमिर-रविरङ्घ्रि-रजस्तव गिरिशनुतम् ।
सेवकहितकरि शङ्करसहचरि जय शिवसुन्दरि पाहि सुतम् ॥ ५॥

छित्त्वा निजशिर आपिबसि रुधिरमसिहस्ता गुणमापतितम् ।
रतिकामोपरि पदमर्दनकरि जय शिवसुन्दरि पाहि सुतम् ॥ ६॥

धूमावति सति भक्षित-निजपति रथमारोहसि करटयुतम् ।
तनुरुचिधूसरि कलहप्रमदकरी जय शिवसुन्दरि पाहि सुतम् ॥ ७॥

पीतकवसने धृतरिपुरसने जहि गदयार्दिततामयुतम् ।
प्रणतदयादरि काले जित्वरि जय शिवसुन्दरि पाहि सुतम् ॥ ८॥

पाशाङ्कुशमसि-खेटं प्रवहसि हंसि रिपुं शुचि-रोषयुतम् ।
मातङ्गि कदरि-विदलन-कुञ्जरि जय शिवसुन्दरि पाहि सुतम् ॥ ९॥

द्विरद-चतुष्टय-विधृत-कनकमय-कलशैः स्नापनमाचरितम् ।
कमले गरुडे हरिधृततस्करि जय शिवसुन्दरि पाहि सुतम् ॥ १०॥

इति वामदेवशिष्य महात्मापूर्णक्ष्यापा विरचितं दशमहाविद्यास्तुतिः समाप्ता ।

Proofread by Rajani Arjun Shankar

*Dashamahavidya Stutih*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*